तृतीयः पाठः

# शीलम् एतत् प्रशस्यते

**सुभाषितानि संस्कृतभाषायाः रत्नानि सन्ति। 'सुष्ठु भाषितम्' इति सुभाषितम्। लघुकलेवराणि अपि एतानि सुभाषितानि भावदृष्ट्या महान्तम् अर्थम् उद्वहन्ति। व्यावहारिके जीवने एतेषां सुवचनानां विशिष्टं महत्त्वम् अस्ति। नैराश्ये एतानि प्रेरकानि वचनानि प्रेरणारूपेण कार्यं कुर्वन्ति। लोकाचारं व्यवहारज्ञानं च प्रदाय जीवनपथं परिष्कुर्वन्ति। जीवनस्य पथि एतानि पाथेयमिव अस्माकं हितं रचयन्ति।**

**अधुना पठिष्यामः कानिचित् एतानि सुन्दराणि हितकराणि सुभाषितानि अस्मिन् पाठे।**

1. **सभ्भोजनं सङ्कथनं सम्प्रीतिश्च परस्परम्।**
**ज्ञातिभिः सह कार्याणि न विरोधः कदाचन॥**

*अन्वयः-* ज्ञातिभिः सह सम्भोजनम्, सङ्कथनम् सम्प्रीतिः च कार्याणि। परस्परम् विरोधः कदाचन न कार्यः।

2. **चक्षुषा मनसा वाचा कर्मणा च चतुर्विधम्।**
**प्रसादयति यो लोकं तं लोकोऽनुप्रसीदति॥**

*अन्वयः-* यः चक्षुषा मनसा वाचा कर्मणा च लोकम् चतुर्विधम् प्रसादयति, लोकः तम् अनुप्रसीदति।

3. **आशायाः ये दासास्ते दासाः सर्वलोकस्य।**

**आशा येषां दासी तेषां दासायते लोकः॥**

*अन्वयः-* ये आशायाः दासाः ते सर्वलोकस्य दासाः (भवन्ति)। आशा येषाम् दासी, लोकः तेषाम् दासायते।

4. **क्षणे रुष्टाः क्षणे तुष्टा, रुष्टास्तुष्टा क्षणे क्षणे।**

**अव्यवस्थितचित्तानां प्रसादोऽपि भयङ्करः॥**

*अन्वयः-* ये क्षणे रुष्टाः क्षणे (च) तुष्टाः क्षणे-क्षणे च रुष्टाः तुष्टाः भवन्ति। (तेषाम्) अव्यवस्थितचित्तानाम् प्रसादः अपि भयङ्करः (भवति)।

5. **यथा भूमिः तथा तोयं, यथा बीजं तथाङ्कुरः।**

**यथा देशः तथा भाषा, यथा राजा तथा प्रजा॥**

*अन्वयः-* यथा भूमिः तथा तोयम्, यथा बीजम् तथा अङ्कुरः। यथा देशः तथा भाषा यथा राजा तथा प्रजा।

6. **कराविव शरीरस्य नेत्रयोरिव पक्ष्मणी।**

**अविचार्य प्रियं कुर्यात्तन्मित्रं मित्रमुच्यते॥**

*अन्वयः-* करौ शरीरस्य इव, पक्ष्मणी नेत्रयोः इव (यत् मित्रम्) अविचार्य प्रियम् कुर्यात् तत् मित्रम् मित्रम् उच्यते।

7. **आरभन्तेऽल्पमेवाज्ञाः कामं व्यग्राः भवन्ति च।**

**महारभ्भाः कृतधियस्तिष्ठन्ति च निराकुलाः॥**

*अन्वयः-* अज्ञाः अल्पम् एव आरभन्ते, कामम् व्यग्राः च भवन्ति। कृतधियः, महारम्भाः निराकुलाः च तिष्ठन्ति।

8. **यः पठति लिखति पश्यति,**

**परिपृच्छति पण्डितानुपाश्रयति ।**

**तस्य दिवाकरकिरणैः नलिनी-**

**दलमिव विकास्यते बुद्धिः ॥**

*अन्वयः-* यः पठति, लिखति, पश्यति, परिपृच्छति, पण्डितान् उपाश्रयति, दिवाकरकिरणैः नलिनीदलम् इव तस्य बुद्धिः विकास्यते ।

9. **अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।**

**अनुग्रहश्च दानञ्च शीलमेतत् प्रशस्यते ॥**

*अन्वयः-* कर्मणा मनसा गिरा सर्वभूतेषु अद्रोहः, अनुग्रहः च दानम् च एतत् शीलम् प्रशस्यते ।

## *अनुप्रयोगः*

**1. (क) अधोलिखितानां पदानाम् उच्चारणम् कुरुत -**

सम्प्रीतिश्च , लोकोऽनुप्रसीदति , रुष्टास्तुष्टाः , नेत्रयोरिव , कराविव , कुर्यात्तन्मित्रम् , कृतधियस्तिष्ठन्ति

**(ख) उपर्युक्तपदानाम् अनुलेखनम् कुरुत ।**

**2. (अ) अधोलिखितेषु पदेषु तालव्यवर्णान् चित्वा लिखत -**

(क) चक्षुषा ........................... ...........................

(ख) आशायाः ........................... ...........................

(ग) आश्रयति ........................ ........................

(घ) वाचि ........................ ........................

(ङ) सम्भोजनम् ........................ ........................

**2. (ब) निर्देशानुसारम् उत्तरत -**

(क) 'रुष्टः' इति पदे कः वर्णः ओष्ठ्यः ?

(ख) 'तुष्टः' इति पदे कः वर्णः दन्त्यः ?

(ग) 'किरणैः' इति पदे कः वर्णः कण्ठतालव्यः ?

(घ) 'अविचार्य' इति पदे कः वर्णः दन्तोष्ठ्यः ?

(ङ) 'भाषा' इति पदे कः वर्णः मूर्धन्यः ?

**3. (अ) उदाहरणम् अनुसृत्य अधोलिखितानां पदानां समासं कुरुत -**

*यथा* न धर्मः - अधर्मः

न अभ्यासः - अनभ्यासः

(क) न विचार्य ......................................

(ख) न द्रोहः ......................................

(ग) न ज्ञः (जानाति इति) ......................................

(घ) न जीर्णः ......................................

(ङ) न उचितम् ......................................

**3. (ब) अधोलिखिततालिकायां रिक्तस्थानपूर्तिं कुरुत -**

| | | | | |
|---|---|---|---|---|
| (क) दानम् | + | च | = | ........................ |
| (ख) रुष्टाः | + | तुष्टाः | = | ........................ |
| (ग) प्रीतिः | + | ....... | = | प्रीतिश्च |

| | | | | | |
|---|---|---|---|---|---|
| (घ) | ......... | + | इव | = | नेत्रयोरिव |
| (ङ) | ......... | + | च | = | अनुग्रहश्च |
| (च) | करौ | + | इव | = | ...................... |
| (छ) | प्रसादः | + | अपि | = | ...................... |

**4. पदानां समानार्थकानि पदानि पाठात् चित्वा लिखत -**

(क) सहभोजनम् ..................

(ख) सम्बन्धिभिः ..................

(ग) जलम् ..................

(घ) संसारः ..................

(ङ) वाचा ..................

(च) अनुग्रहः ..................

(छ) हस्तौ ..................

(ज) परितृप्तः ..................

**5. 'यथा' 'तथा' इति अव्ययोः प्रयोगः सह एव भवति।**

*उदाहरणम्–*

यथा गुरवे रोचते शिष्यः तथा करोति।

**एवमेव अधोलिखितानि वाक्यानि पूरयत–**

(क) .................. भूमिः .................. जलम्।

(ख) .................. बीजम् .................. अङ्कुरः।

(ग) .................. देशः .................. भाषा।

(घ) .................. राजा .................. प्रजा।

(ङ) .................. करौ शरीरं रक्षतः पक्ष्मणी च नेत्रयोः रक्षां कुरुतः .................. एव सन्मित्रम् मित्रस्य हितं करोति।

(च) .................. सूर्यकिरणाः कमलिनीपत्रं विकासयन्ति .................. विद्यायाः अभ्यासः बुद्धेः विकासं करोति ।

## 6. अधोलिखितान् प्रश्नान् संस्कृतभाषया उत्तरत -

(क) कैः सह विरोधः न कर्तव्यः ?

(ख) लोकः केभ्यः दासवत् आचरति ?

(ग) केषां कृपा अपि भयम् उत्पादयति ?

(घ) संसारः कं नरम् अनुप्रसीदति ?

(ङ) शीलं किं कथ्यते ?

(च) कस्य बुद्धिः विकसिता भवति ?

(छ) महत्कार्यं कुर्वन्तः अपि के व्याकुलाः न भवन्ति ?

## 7. अधोलिखितभावानां समक्षं पाठात् चित्वा समुचितं श्लोकं पंक्तिम् वा लिखत -

(क) बुद्धिमन्तः महद् अपि कार्यम् आरभ्य कदापि व्याकुलाः न भवन्ति ।

..........................................................................................................................

(ख) यादृशी भूमिः भवति जलस्य आस्वादः अपि तादृशः एव भवति ।

..........................................................................................................................

(ग) अस्थिरचित्ताः जनाः अतिशीघ्रम् प्रसन्नाः अप्रसन्नाः वा भवन्ति । अतः तेषाम् अनुग्रहः अपि विश्वसनीयः न भवति ।

..........................................................................................................................

(घ) बुद्धेः सम्यक् विकासार्थं पठनं लेखनं परिप्रश्नः आदिभिःक्रियाविधिभिः अभ्यासः कर्तव्यः ।

..........................................................................................................................

(ङ) यस्य नरस्य नयनयोः प्रेमभावः, मनसि परहितचिन्तनं, वाचि माधुर्यं, कर्मणि च प्रियं हितं कर्तुम् तत्परता भवति सः एव लोके प्रशंसनीयः।

.......................................................................................................................

## 8. श्लोकान् आधृत्य रिक्तस्थानानि पूरयत –

(क) सम्बन्धिभिः सह कदापि .................. न कर्त्तव्यः।

(ख) .................. दासाः सर्वलोकस्य दासाः भवन्ति।

(ग) अस्थिरचित्तानाम् अनुग्रहः अपि .................. जनयति।

(घ) .................. कार्यम् आरभ्य व्याकुलाः भवन्ति।

(ङ) सर्वभूतेषु .................., अनुग्रहः .................. च शीलं कथ्यते।

## 9. अधोलिखितानां सूक्तीनां समक्षं पाठात् चित्वा समुचितपङ्क्तिं लिखत –

(क) सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्।

.......................................................................................................................

(ख) अङ्गीकृतं सुकृतिनः परिपालयन्ति।

.......................................................................................................................

(ग) देशमाख्याति भाषणम्।

.......................................................................................................................

(घ) राज्ञि धर्मिणि धर्मिष्ठाः, पापे पापाः समे समाः।

.......................................................................................................................

(ङ) अवशेन्द्रियचित्तानां हस्तिस्नानमिव क्रियाः।

.......................................................................................................................

# पाठविकासः

क. पाठे सङ्कलितानां सुभाषितानां सन्दर्भाः

| *श्लोकसङ्ख्या* | *सन्दर्भग्रन्थः* |
|---|---|
| 1–2 | विदुरनीतिः |
| 3 | कवितामृतकूपः |
| 4 | अज्ञातः |
| 5 | वैद्यकीयसुभाषितम् |
| 6 | सुभाषितरत्नभाण्डागारम् |
| 7 | मनुस्मृतिः |
| 8 | शिशुपालवधम् |
| 9 | सुभाषितरत्नभाण्डागारम् |

ख. समानान्तरसूक्तयः

- आशा नाम मनुष्याणां काचिदाश्चर्यशृङ्खला ।
  यया बद्धा प्रधावन्ति मुक्तास्तिष्ठन्ति पङ्गुवत् ।।

- अवशेंन्द्रियचित्तानां हस्तिस्नानमिव क्रिया ।
  दुर्भगाभरणप्रायो ज्ञानं भारः क्रियां विना ।।

- विघ्नैः पुनः पुनः अपि प्रतिहन्यमानाः
  प्रारभ्य चोत्तमजनाः न परित्यजन्ति ।

- अङ्गीकृतं सुकृतिनः परिपालयन्ति ।

- न्याय्यात्पथः प्रविचलन्ति पदं न धीराः।

- समानी व आकूतिः समाना हृदयानि वः।
  समानमस्तु वो मनो यथा वः सुसहासति ।। (ऋग्वेदः 10/191/4)

- क्षणमानन्दितामेति क्षणमेति विषादिताम्।
  क्षणं सौम्यत्वमायाति सर्वस्मिन्नटवन्मनः ।। (योगवासिष्ठः 1/28/38)

- किमिवावसादकरमात्मवताम्। (किरातार्जुनीयम् 6/19)